International Journal of Sanskrit Research 2018; 4(1): 114-115

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 114-115
© 2018 IJSR
www.anantaajournal.com
Received: 14-11-2017
Accepted: 19-12-2017

**डॉ० प्रियरंजन मिश्रः**
मिल्की, हरदिया, सिंघिया, मण्डलम्.
समस्तीपुरम्, बिहार, भारत

**Corresponding Author:**
**डॉ० प्रियरंजन मिश्रः**
मिल्की, हरदिया, सिंघिया, मण्डलम्.
समस्तीपुरम्, बिहार, भारत

# धातुपाठस्य महत्त्वम्

## डॉ० प्रियरंजन मिश्रः

**प्रस्तावना**

येषाञ्चोत्पत्तौ क्लिष्टतयैव प्रवृत्तिस्तेषां हि खिलरूपे उणादिपाठे च विचारः। तो हि शब्दानुशासनेणादिसाधितौ शब्दौ यौगिकौ। एषाञ्च यौगिकत्वं क कदापि विभज्य ज्ञातुं शक्यते ते हि शब्दा उव्युत्पन्ना एव। पूर्व-काले तेऽपि व्युत्पन्ना आसन्। कालक्रमेण तेषां व्युत्पत्तिरसम्भवाऽभवत्। तेन हि यत्र शाकटायनसदृशा वैरूाकरणाः सर्वानपि शब्दान् धातुजान् मन्यन्ते स्म, तत्र पाणिनिर्हि शब्दानामव्युत्पन्नत्वमपि स्वीचकार “अर्थवदधातुरप्रत्ययः प्रातिपादिकम्” [1] इति कथने “कृत्तद्धितसमासाश्च” इति योगेन प्रातिपदिकं हि त्रैधा निष्पद्यते’ धातौ कृत्यप्रत्यययोगेन तस्मिन् हि तद्धितप्रत्यययोगेन तयोस्तेषां वा समसनेन च।

एतदतिरिक्तमपि ये हि शब्दाः प्रचलिताः सन्तितेऽपि प्रातिपदिकसंज्ञा भजन्त इति। शब्दो द्विधा भवति व्युत्पन्नोऽव्युत्पन्नश्च। तत्र व्युत्पन्न” कृत्तद्धिसमासाश्च” सिद्धोऽव्युत्पन्नश्च स्वयं सिद्ध इति। स्वयं सिद्धो हि धातुः प्रत्ययश्च प्रातिपदिकसंज्ञा नैवं भजतः निरर्थक शब्द इति।

तत्र येषु हि शब्देषु धात्वर्थस्थानुमगनं प्रतीयते ते हि यौगिकाः येषु च प्रतीतेष्वपि धात्वर्थानुगमने कश्मिश्चिदेवार्थविशेषे नियतत्वं प्रतीयते। ते हि योगरूढ़ाः येषु च कथञ्चिदपि धात्वर्थानुगमनं नैव प्रतीयते। ते हि रूढ़ा एवेति शब्दा-योगरूढ-शब्दानां सिद्धिस्तु मूलव्याकरणतो ज्ञायते रूढशब्दसिद्धिमिमित्तमेवोणादिप्रकरणं परिकल्पितम्।

शब्दब्रह्मणोऽनन्तत्वादौणादिकगत्यपि असाध्य-व्युत्पत्तिक-शब्दानामुच्चारणे उदात्तादि-स्वरज्ञानाय फिट् सूव्यवस्थाऽपि परिकल्पितम्।

शब्दब्रह्मणोऽनन्तत्वादौणादिकगत्यपि असाध्य-व्युत्पत्तिक-शब्दानामुच्चारणे उदात्तादि-स्वरज्ञानाय फिट् सूव्यवस्थाऽपि कृताऽचार्यैः। यथा भाष्कार आह- “प्रातिपदिक- विज्ञानञ्च भगवतः पाणिनेराचार्यस्य सिद्धम। उणादयोऽव्युत्पन्नानि प्रातिपदिकानि” इति [2] - 7/1/21

प्रथमं तु सर्वेऽपि शब्दा यौगिका एवासन्। अनन्तरं तेषां धात्वर्थानुगमनविस्मृतेः रूढत्वं सञ्जातम्। एतादृशं रूढत्वं प्रथमं निपातशब्दे समुत्पन्नम्, ततश्च कृदन्त-शब्दे ततश्च संज्ञावाचिनी तद्धितशब्देऽपि। अनन्तरञ्च सर्वेऽपि शब्दाः स्वकीयां यौगिका स्थितिमपहाय रूढत्वमाश्रितवन्तो यथ्ज्ञा पाचक- वृक्ष-ब्राह्मणादिशब्दाः। तेनैव कातन्त्रीये कृदन्तमेव नैव् व्याख्यातम्। केचित्तु शब्दं पूर्वतो विद्यमानं मन्यन्ते, प्रकति- प्रत्ययविभागस्तु तज्ज्ञान-

सौकर्याय परिकल्पिमात्रम्, तेनैव तत्र विदुषां नैकमत्यम्। वाक्यपदीये यथोक्तम्- "अन्वाख्यानानि भिद्यन्ते शब्द-व्त्पत्तिकर्मसु शब्दाना प्रकृति- प्रत्ययविभागद्वारा साधनेन सह सम्बद्धम्। तत्र प्रकृति मूलम्। तत्र प्रकृतिः किम्? – "यस्मात्तु प्रत्ययविधिः कल्प्यते सा प्रकृतिः तेन हि समस्तशब्दानां कृदन्त- तद्धितान्तशब्दयोरेव प्रकृतित्वम्ः।। तद्धितान्तशब्दानां कृदन्त- शब्दे प्रकृतित्वम्। कृदन्त-शब्दानाञ्च धावतो हि प्रकृतयः। तेनैव सर्वेऽपि शब्दाः धातुजाः। धातवो हि भूवादयः। विविधानां शब्दरूपाणां धारको धातुः, तेनैव दधाति शब्दस्वरूपं यः स धातुरिति। स एव आख्यात- विभक्तियुक्तः क्रियावाचकः कृत्प्रत्यययुक्तश्च नामादिवाचकः। निपाता, अव्ययं, कर्मप्रवचनीयः, "कुगति-प्रादयो"ऽपि धातोः कृत्प्रत्यययोगेनैव जाताः, किन्त तेऽज्ञातमूलाः।

पाणिनी-मतेऽव्ययानामपि प्रातिपदिकसंज्ञा सुबुत्पत्तिश्च भवति। पश्चाच्य तल्लुप्यते "अव्ययादाप्सुपः [3]" इति प्रबन्धेन। सामान्यवस्तु धातुपाठो यस्य कस्यापि व्याकरणस्य मूलकत्वम्। सर्वे हि शब्दा धातुमूला इति धातोः प्राथम्यमपरिहार्यमेव। यत्किञ्चिदपि पूर्ण व्याकरणं धातुपाठेन विना नैव समग्रतां भजते। सत्यपि शब्दसाधने धातोरपरिहार्यमहत्वे धातुर्हि शब्दप्रकृत्यनुसारेण अपिशलिः "स भुवि" इति पठति, पाणिनिस्तु "अस् भुवि" इति। श्रूयते हि इन्द्रेणाऽपि धातुपाठः प्रोक्त आसीत्, एवञ्च वायुनाऽपि।

वस्तुतस्तु आपिशलि-काशकृत्सन-शाकटायन-भागुरि-प्रभृतिभिरपि स्वस्मप्रदायानुसारी धातुपाठः प्रोक्त आसीत्। एवमेव हि पाणिनीयो धातुपाठः सम्प्रति समुपलब्धेरूाषु धातुपाठेष्वन्यतमः। केचित्तु तस्य पाणिनीयत्वं प्रत्याचक्षते, तेषु हि न्यासकारो जिनेन्द्रबुद्धिर्मुख्यः। परञ्च तेन प्रतिपादितं हि पूर्व गणकरः पाणिनि र्न भवतीति। तथा-चान्योगणकारोऽन्यश्च सूत्रकार इति कथने गणकारशब्देन किमभीष्टमिति नैव स्पष्टं तथापि यद्यप्यत्र त्रिग्रहणं क्रियते निजादीनामन्ते वृत्करणं किमर्थम्? एतद्गणकाः प्रष्टव्याः न सूत्रकार। अन्यो हि गणकारोऽन्यश्च सूत्रकार इत्युक्तं प्राक्-इति कथने स्पष्टमेव धातुपाठस्य पाणिनीयत्वं प्रत्याख्यातमस्ति। किन्तु स एवान्यत्र "न तरय पाणिनेरिव" अस् भुवि" इति गणपाठः इति प्रतिपाद्य धातुपाठस्य पाणिनि-प्रोक्तत्वं समर्थयति। कृतः सामान्यतो धातूनामर्थानाभाजन्त्यादवगता परिसीमनं नैव कृतम्। तेन भू सत्तायाम्, एध वृद्धौ इत्यादिपाठस्तु अर्वाचीन एव। अतएव अर्थसहितो वृद्धपाठोऽर्थरहितश्च लघुपाठ इति।

पाणिनीयधातुपाठे हि द्विसहस्रमिता धातवः सन्ति ये हि दशसु गणेषु विभक्ताः सन्ति। गणाश्च भ्वादि-अदादि-जुहोत्यादि-दिवादि-स्वादि- रूधादि- तुदादि- तनादि-क्रयादि-चुरादयो येषां विकरणाः क्रमेण शप्-लुक्-श्लु-श्यन्-श्नु-श्नम्-श-उ-श्ना-णिचः।

शब्बिकरणः सार्वत्रिकाः कर्तरि प्रयोज्यः अदादिगणे तस्य लुक भवति, जुहोत्यादौ श्लुः दिवादौ शपं बाधित्व श्यन् भवति, एवमेवान्यत्रापि चुरादौ णिचोऽनन्तरं शबपि भवति, तेन भवति, अत्ति, जुहोति, दीव्यति, सुनोत, रूणद्धि, तुदति, तनोति, क्रीणति, चोरयति इति लटि तिपि रूपाणि भवन्ति। तत्रापि धातवः स्व-प्रकृत्यनुसारेण परस्मैपदिनः आत्मनेपदिनः अभ्यपदिनश्च सन्ति। एक एवापि धार्तुरर्थवशात्पदान्तरं भजते। यथा भू धातुः सत्तार्थे परस्मैपदी यथा भवति, प्रात्यर्थे आत्मनेपदी यथा-भवते, वभूवे। उभयपदिषु "कर्तृगामिनि क्रियाफले" आत्मनेपदिनः, परगामिनी तु परस्मैपदिनः यथा करोति, कुरूते। तिप् तस् झि (अन्ति)। सिप् थस् थ। मिप्-वस्-मस् एताः परस्मैपदविभक्तयः। तथैव तु त-आतां झ, थास् आथां-ध्वम्, इड्-वहि-महिङ एता आत्मनेपदविभक्तयः।

पाणिनीयधतुपाठस्य प्रामणिकता एतावदेव सिद्धयतियत्तदाधरेणानेके तत्सम्बद्धग्रन्थाः ग्रणीता दृश्यन्ते। ते च तथा धातुपाठश्चानेकैः विंद्वद्धि व्याख्यातोऽत तेषु पाणिनि-सुनाग-भीमसेन-धातुपारायण कर्तु-धातुवृत्तिकृत् नन्दिस्वामी-वाथकौशिक-क्षीरस्वामी-मैत्रेरक्षित-हरियोगि-देव- लीलांशुक-हेलाराज-रायण-प्रभृत्तयः। [4]

पाणिनिर्हि स्वप्रोक्तस्य धातुपाठस्य वृत्तिमपि प्रोक्तवानिति पूर्वमुक्तम्, यथाह सायणः- अस्माकं तूभयमपि, तप ऐश्वर्ये वा, वृतु वरणे, तप ऐश्वर्ये वावृतु वरणे प्रमाणम्, उभयथा शिष्याणां प्रतिपाद्रात् सुनागेनाऽपि पाणिनीयधातुपाठोपरि वृत्तिः लिखितेति ग्रन्थान्तरतो ज्ञायते। यथोक्तं क्षीरतङ्गिण्याम्- धातूनार्मनिर्देशोऽयं निर्देशनार्थ इति सौनागाः। यदाहुः-

क्रियावाचित्वमाख्यातुमेकोऽत्रार्थः प्रदर्शितः।
प्रयोगतोऽनुगन्तव्या अनेकार्था हि धातवः।।

**सन्दर्भा:**


1. पाणिनीयसूत्रम् -1/2/45 ।
2. पाणिनीयसूत्रम् -711/21 ।
3. पाणिनीयसूत्रम् -214/82 ।
4. व्याकरणशास्त्रेतिहास पृष्ठसंख्या- 37।